श्री विष्णोर्दिव्यस्थल स्तोत्रं

श्री विष्णोर्दिव्यस्थल स्तोत्रं

अर्जुन उवाच |
क्षेत्रेषु येषु येषु त्वं चिंतनीयो मयाच्युत |
चेतसः प्रणिधानार्थं तन्ममाख्यातुमर्हसि || 1 ||

यत्र यत्र च यन्नाम प्रीतये भवतः स्तुतौ |
प्रसादसुमुखो नाथ तन्ममाशेषतो वद || 2 ||

भगवानुवाच |
सर्वगः सर्वभूतोऽहं न हि किंचिन्मया विना |
चराचरे जगत्यस्मिन् विद्यते कुरुसत्तम || 3 ||

तथापि येषु स्थानेषु चिंतनीयोऽहमर्जुन |
स्तोतव्यो नामभिर्यैश्च श्रूयतां तद्वदामि ते || 4 ||

पुष्करे पुंडरीकाक्षं गयायां च गदाधरं |
लोहदंडे तथा विष्णुं स्तुवंस्तरति दुष्कृतं || 5 ||

राघवं चित्रकूटे तु प्रभासे दैत्यसूदनं |
बृंदावने च गोविंदं मां स्तुवन् पुण्यभाग्भवेत् || 6 ||

जयं जयंत्यां तद्वच्च जयंतं हस्तिनापुरे |
वराहं कर्दमाले तु काश्मीरे चक्रपाणिनं || 7 ||

जनार्दनं च कुब्जाम्रे मथुरायां च केशवं |
कुब्जके श्रीधरं तद्वद्गंगाद्वारे सुरोत्तमं || 8 ||

सालग्रामे महायोगिं हरिं गोवर्धनाचले |
पिंडारके चतुर्बाहुं शंखोद्धारे च शंखिनं || 9 ||

वामनं तु कुरुक्षेत्रे यमुनायां त्रिविक्रमं |
विश्वेश्वरं तथा शोणे कपिलं पूर्वसागरे || 10 ||

श्वेतद्वीपपतिं चापि गंगासागरसंगमे |
भूधरं देविकानद्यां प्रयागे चैव माधवं || 11 ||

नरनारायणाख्यं च तथा बदरिकाश्रमे |
समुद्रे दक्षिणे स्तव्यं पद्मनाभेति फाल्गुन || 12 ||

द्वारकायां तथा कृष्णं स्तुवंस्तरति दुर्गतिं |
रामं नाम महेंद्राद्रौ हृषीकेशं तथार्बुदे || 13 ||

अश्वतीर्थे हयग्रीवं विश्वरूपं हिमाचले |
नृसिंहं कृतसौचे च विपाशायां द्विजप्रियं || 14 ||

नैमिषे यज्ञपुरुषं जंबूमार्गे तथाच्युतं |
अनंतं सैंधवारण्ये दंडके शार्ङ्गधारिणं || 15 ||

उत्पलावर्तके शौरिं नर्मदायां श्रियः पतिं |
दामोदरं रैवतके नंदायां जलशायिनं || 16 ||

सर्वयोगेश्वरं चैव सिंधुसागरसंगमे |
सह्याद्रौ देवदेवेशं वैकुंठं मागधे वने || 17 ||

सर्वपापहरं विंध्ये चोड्रेषु पुरुषोत्तमं |
हृदये चापि कौंतेय परमात्मानमात्मनः || 18 ||

वटे वटे वैश्रवणं चत्वरे चत्वरे शिवं |
पर्वते पर्वते रामं सर्वत्र मधुसूदनं || 19 ||

नरं भूमौ तथा व्योम्नि कौंतेय गरुडध्वजं |
वासुदेवं च सर्वत्र संस्मरेज्ज्योतिषां पतिं || 20 ||

अर्चयन् प्रणमन् स्तुन्वन् संस्मरेश्च धनंजय |
एतेष्वेतानि नामानि नरः पापात् प्रमुच्यते || 21 ||

स्थानेष्वेतेषु मन्नाम्नामेतेषां प्रीणनं नरः |
द्विजानां प्रीणनं कृत्वा स्वर्गलोकेऽभिजायते || 22 ||

नामान्येतानि कौंतेय स्थानान्येतानि चात्मवान् |
जपन् वै पंचपंचाशत् त्रिसंध्यं मत्परायणः || 23 ||

त्रीणि जन्मानि यत्पापमवस्थात्रितये कृतं |
तत्क्षालयत्यसंदिग्धं जायते च सतां कुले || 24 ||

द्विकालं वा जपन्वैतद्दिवारात्रौ च यत्कृतं |
तस्माद्विमुच्यते पापात् संस्तुवन्परमो नरः || 25 ||

जप्तान्येतानि कौंतेय सकृच्छ्रद्धासमन्वितं |
मोचयंति नरं पापाद्यत्तत्रैव दिने कृतं || 26 ||

धन्यं यशस्यमायुष्यं जयं कुरु कुलोद्वह |
ग्रहानुकूलतां चैव करोत्याशु न संशयः || 27 ||

उपोषितो मत्परमः स्थानेष्वेतेषु मानवः |
कृतायतनवासश्च प्राप्नोत्यभिमतं फलं || 28 ||

उत्क्रांतिरप्यशेषेषु स्थानेष्वेतेषु शस्यते |
अन्यस्थानाच्छतगुणमेतेष्वनशनादिकं || 29 ||

यस्तु मत्परमः कालं करोत्येतेषु मानवः |
देवानामपि पूज्योऽसौ मम लोके महीयते || 30 ||

स्थानेष्वथैतेषु च ये वसंति
संपूजयंते मम सर्वकालं |
तदेह चांते त्रिदिवं प्रयांति
नाकं च लोकं समवाप्नुवंति || 34 ||

इति श्रीविष्णुधर्मोत्तरे तृतीयखंडे मार्कंडेयवज्रसंवादे अर्जुनं प्रति कृष्णोपदेशे स्थानविशेषकीर्तनमाहात्म्यवर्णनो नाम पंचविंशत्युत्तरशततमोऽध्यायः |